हो, व्य, (हूयते अनेनेति । ह्वे+डो । निपातनात् साधुः ।) सम्बोधनम् । आह्वानम् । इति मेदिनी ॥ (यथा, किरातार्ज्जुनीये । १५ । २० ।
"ननु हो मथनाराघो घोरानाथ मह्नोनु न ।
तयदा.तवदा भीमा माभीदावत दायत ॥")
विस्मयः । इत्यमरः ॥

होड, ऋ ङ गतौ । अनादरे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ऋ, अजुहोड़त् । ङ, होड़ते । इति दुर्गादासः ॥

होड़ः, पुं, (होड़ते गच्छतीति । होड़ गतौ+अच् ।) नौकाविशेषः । हुड़ी इति भाषा । तत्पर्य्यायः । तराम्बुः २ वहनम् ३ वहित्रम् ४ वार्व्वटः ५ । इति त्रिकाण्डशेषः (होड्यते इति । होड् अनादरे+कर्म्मणि घञ् ।) दक्षिणराढ़ीयमौलिककायस्थानां द्विसप्ततिपद्धत्यन्तर्गतपद्धतिविशेषः । इति कुलाचार्य्यग्रन्थः ॥ गौड़देशीयश्रोत्रियब्राह्मणविशेषाणामुपाधिश्च । अस्य प्रमाणं अन्नदामङ्गलग्रन्थे भुवानन्दमिश्रग्रन्थे च द्रष्टव्यम् ॥

होड़ा, [ऋ] पुं, चोरः । इति केचित् ॥

होता, [ऋ] पुं, (जुहोतीति । हु+"नप्तृनेष्टृत्वष्टृहोत्रिति ।" उणा० २ । ९६ । इति तृन् निपातितश्च । यद्वा, हु+तृच् ।) ऋग्वेदवेत्ता । इत्यमरः । २ । ७ । १७ ॥ होमकर्त्ता । यथा । विशिष्टदेशावच्छिन्नप्रक्षेपोपहितहविस्त्यागस्य होमत्वात् प्रक्षेपस्य तदभिधाननिमित्तमित्यर्थः । तेन हुधात्वर्थव्यवच्छेदकप्रक्षेपानुकूलव्यापारवति ऋत्विजि होता इत्यादिव्यपदेशः । इति दायभागटीकायां श्रीकृष्णतर्कालङ्कारः ॥

होतृकारः, पुं, होतृ ऋकारः । होतुर्माता । इति मुग्धबोधव्याकरणम् ॥

होत्रं, क्ली, (हूयते इति । हु+"हुयामाश्रुभसिभ्यस्त्रन् ।" उणा० ४ । १६७ । इति त्रन् ।) हविः । इति त्रिकाण्डशेषः ॥ होमः । इति हेमचन्द्रः ॥

होत्रा, स्त्री, (हु+त्रन्+टाप् ।) स्तुतिः । इति केचित् ॥ (आह्वयमाना देवता । यथा, ऋग्वेदे । १ । १८ । ८ ।
"आदृध्नोति हविष्कृतिं प्राञ्चं कृणोत्यध्वरम् ।
होत्रा देवेषु गच्छति ———————— ॥"
'होत्रा ह्वयमाना देवता ।' इति तद्भाष्ये सायनः ॥)

होत्री, [न्] पुं, होता । होत्रं विद्यतेऽस्य इति होत्रशब्दात् इन्प्रत्ययेन निष्पन्नः ॥

होत्री, स्त्री, (हु+तृच्+ङीप् ।) यजमानरूपा शिवस्य मूर्त्तिः । यथा,—
"या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।
यामाहुः सर्व्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥"
इत्यभिज्ञानशकुन्तलाप्रथमश्लोकः ॥

होत्रीयं, क्ली, (होत्राय हितम् होतुरिदं वेति । छः ।) हविर्गेहम् । इति हेमचन्द्रः ॥ होत्रसम्बन्धिनि, त्रि ॥ (यथा, शतपथब्राह्मणे । ९ । ४ । ३ । ७ ।
"एकविंशतिं होत्रीय उपदधाति ॥")

होमः, पुं, (हवनमिति । हु+"अर्त्तिस्तुसुहुसृ..." इति ।" उणा० १ । १३९ । इति मन् ।) पञ्चमहायज्ञान्तर्गतयज्ञविशेषः । इत्यमरः । २ । ७ । १४ ॥ स तु देवयज्ञः । यथा,—
"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"
इति मनुः ॥

तल्लक्षणं यथा,—
"विशिष्टदेशावच्छिन्नप्रक्षेपोपहितत्यागः ॥"
इति श्रीकृष्णतर्कालङ्कारः ॥ * ॥

अथ नित्यहोमः । तदुक्तं सोरुभुजगावल्याम् ।
"नाजप्तः सिद्ध्यते मन्त्रो नाहुतश्च फलप्रदः ।
नानिष्टो यच्छते कामान् तस्मात्त्रितयमर्च्चयेत् ॥
पूजया लभते पूजां जपात् सिद्धिर्न संशयः ।
विभूतिं चाग्निकार्य्येण सर्व्वसिद्धिश्च विन्दति ॥"
मौलतन्त्रेऽपि ।
"नित्यहोमं प्रवक्ष्यामि सर्व्वार्थं येन विन्दति ॥
सपर्य्यां सम्यगापाद्य बलिपूर्व्वं चरेद्विधिम् ॥
ततो होमं तर्पणञ्च चरेत् साधकसत्तमः ।
बलिवैश्वादिकं चैव ब्राह्मणः समुपाचरेत् ॥
अर्घोदकेन संप्रोक्ष्य तिस्रो रेखाः समालिखेत् ।
विधिवदग्निमानीय क्रव्यादेभ्यो नमस्तथा ॥
मूलमन्त्रं समुच्चार्य्य कुण्डे वा स्थण्डिलेऽपि वा ।
भूमौ वा संस्तरेद्वह्निं व्याहृतित्रितयेन च ।
स्वाहान्तेन त्रिधा हुत्वा षडङ्गहवनं चरेत् ॥"
तथा ।
"ततो देवीं समावाह्य मूलेन षोड़शाहुतिम् ।
हुत्वा स्तुत्वा नमस्कृत्य विसृजेदिन्दुमण्डले ॥"
श्यामादौ विशेषः ।
"भैरवांश्च हुनेदष्टौ आज्याक्तैस्तिलैः शुभैः ।
पूर्व्वादिदिक्क्रमेणैव ततो होमं समाचरेत् ॥"*
अथ संक्षेपहोमप्रयोगः ।
"कुण्डे वा स्थण्डिले वापि वीक्षणादिभिः संस्कृते ।
प्रागग्रा उदगग्राश्च तिस्रो रेखाः समालिखेत् ॥"
तथा च ।
"वीक्षणं मूलमन्त्रेण शरेण ताड़नं मतम् ।
तेनैव प्रोक्षणं प्रोक्तं वर्म्मणाभ्युक्षणं मतम् ॥"
ततो मूलमुच्चार्य्य कुण्डाय नमः इति संपूज्य प्रागग्रा उदगग्रास्तिस्रो रेखाः कर्त्तव्याः । प्रागग्रेषु मुकुन्देशपुरन्दरान् प्रादक्षिण्येन संपूज्य उदगग्रासु ब्रह्मवैवस्वतेन्दून् पूजयेत् । सुन्दरीपक्षे तु सर्व्वत्र षट्तारी प्रयोगः षट्तारी च ऐं क्लीं श्रीं ऐं क्लीं सौः ऊह्माले नमः एवं क्रमेण पूजयेत् । तथा ब्रह्मसंहितायां होमकुण्डे ।
"ऐशान्यां वेदिकां हस्तविस्तारोन्नतिशालिनीम् ।
कृत्वास्मिन् स्थापयेत् कुम्भं यथोक्तक्रमयोगतः ॥
तत्र संपूजयेद्देवं यथाविध्युपचारकैः ।
ततो होमं प्रकुर्व्वीत देवतासन्निधानतः ॥"
ततः कुण्डमध्ये षट्कोणवृत्तत्रिकोणं तद्बहिरष्टदलपद्मं तद्बहिश्चतुरस्रं चतुर्द्वारसमितं लिखित्वा तदुपरि मूलेन पुष्पाञ्जलीन् दद्यात् । सुन्दरीपक्षे तु बालया । ततः सर्व्वाणि प्रणवेनाभ्युक्ष्य वह्नेर्योगपीठमर्च्चयेत् । तद् यथा । कर्णिकोपर्य्याधारशक्त्यादीन् संपूज्य अग्न्यादिकोणचतुष्केषु ॐ धर्म्माय नमः ॐ ज्ञानाय वैराग्याय ऐश्वर्य्याय पूर्व्वादिदिक्षु अधर्म्माय अज्ञानाय अवैराग्याय अनैश्वर्य्याय मध्ये ॐ अनन्ताय नमः । एवं पद्माय अं अर्कमण्डलाय द्वादशकलात्मने नमः । उं सोममण्डलाय षोड़शकलात्मने नमः । मं वह्निमण्डलाय दशकलात्मने नमः । ततः केशरेषु पूर्व्वादिमध्ये च ॐ पीताय नमः । एवं श्वेतायै नमः अरुणायै नमः । कृष्णायै धूम्रायै तीव्रायै स्फुलिङ्गिन्यै रुचिरायै ज्वालिन्यै ततो रं वह्न्यासनाय नमः । ततः ।
"वागीश्वरीमृतुस्नातां नीलेन्दीवरलोचनाम् ।
वागीश्वरेण संयुक्तां क्रीड़ाभावसमन्विताम् ॥"
इति ध्यात्वा ॐ ह्रीं वागीश्वराय नमः ॐ वागीश्वर्य्यै नमः । इति मन्त्रेण पञ्चोपचारैः संपूज्य सूर्य्यकान्तादिसम्भूतं श्रोत्रियगेहजं वा वह्निमानयेत् । सुन्दरीपक्षे तु कामेश्वरं कामेश्वरीं पूजयेत् । गौतमीये ।
"पाषाणभववह्निश्च यदि वारणिसम्भवम् ।
श्रोत्रियाणां गेहजञ्च वनस्थं वाथवा हरेत् ॥
यदृच्छालाभसंयुक्तो अयोग्यो यागकर्म्मणि ।
निरग्निब्राह्मणाल्लब्धो ह्यर्थलाभकरो भवेत् ॥
क्षत्रबन्धोश्चतुर्थांशफलं दद्याद्धुताशनः ।
वैश्यात् शूद्राच्च विफलं जायते होमकर्म्मणि ।
तस्मात् सर्व्वप्रयत्नेन वह्निमुक्तं समाहरेत् ॥"
तन्त्रान्तरे ।
"द्विजातिभवनाद्वापि वह्निमानीय साधकः ।
वौषड़न्तेन मूलेन मन्त्रितं तं विलोकयेत् ॥
अग्निमावाहयेदस्त्रमन्त्रेण तदनन्तरम् ।
हुं फड़न्तेन मूलेन क्रव्यादांशं परित्यजेत् ॥"
ततः ॐ वह्नेर्योगपीठाय नमः चतुर्दिक्षु ॐ वामायै नमः एवं ज्येष्ठायै रौद्रै अम्बिकायै । ततो मूलमुच्चार्य्य अमुकदेवताकुण्डाय नमः । इति कुण्डं संपूज्य तदधो वागीश्वरीं तत्तद्देवतारूपां ऋतुमतीं ध्यात्वा यथोक्तवह्निमानीय वीक्षणादिभिः संस्कृत्य रमिति तस्मात् वह्निमुद्धृत्य मूलमुच्चार्य्य हुं फट् क्रव्यादेभ्यः स्वाहा इत्यनेन क्रव्यादांशं परित्यज्य वह्निमन्त्रेण संरक्ष्य हुं इत्यवगुण्ठ्य धेनुमुद्रया अमृतीकृत्य बाहुभ्यां